# Gayatrinirvanam

# ગાયત્રીનિર્વાણમ્

## Document Information

Text title : Gayatrinirvanam

File name : gAyatrInirvANam.itx

Category : devii, devI, agnipurANa, gAyatrI

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : agnipurANa | adhyAya 217/2-13||

Latest update : October 3, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 3, 2024

*sanskritdocuments.org*

Gayatrinirvanam

# ગાયત્રીનિર્વાણમ્

અગ્નિરુવાચ ।
લિઙ્ગમૂર્તિં શિવં સ્તુત્વા ગાયત્ર્યા યોગમાપ્તવાન્ ।
નિર્વાણં(૧)પરમં બ્રહ્મ વસિષ્ઠોઽન્યશ્ચ શઙ્કરાત્(૨)॥ ૧॥

નમઃ કનકલિઙ્ગાય(૩)વેદલિઙ્ગાય વૈ નમઃ ।
નમઃ પરમલિઙ્ગાય(૪)વ્યોમલિઙ્ગાય વૈ નમઃ ॥ ૨॥

નમઃ સહસ્રલિઙ્ગાય વહ્નિલિઙ્ગાય વૈ નમઃ ।
નમઃ પુરાણલિઙ્ગાય શ્રુતિલિઙ્ગાય વૈ નમઃ ॥ ૩॥

નમઃ પાતાલલિઙ્ગાય બ્રહ્મલિઙ્ગાય વૈ નમઃ ।
નમો રહસ્યલિઙ્ગાય સપ્તદ્વીપોર્ધ્વલિઙ્ગિને ॥ ૪॥

નમઃ સર્વાત્મલિઙ્ગાય સર્વલોકાઙ્ગલિઙ્ગિને ।
નમસ્ત્વવ્યક્તલિઙ્ગાય બુદ્ધિલિઙ્ગાય વૈ નમઃ ॥ ૫॥

નમોઽહઙ્કારલિઙ્ગાય ભૂતલિઙ્ગાય વૈ નમઃ ।
નમ ઇન્દ્રિયલિઙ્ગાય નમસ્તન્માત્રલિઙ્ગિને ॥ ૬॥

નમઃ પુરુષલિઙ્ગાય ભાવલિઙ્ગાય વૈ નમઃ ।
નમો રજોર્ધલિઙ્ગાય સત્ત્વલિઙ્ગાય(૧)વૈ નમઃ(૨)॥ ૭॥

નમસ્તે ભવલિઙ્ગાય નમસ્ત્રૈગુણ્યલિઙ્ગિને ।
નમોઽનાગતલિઙ્ગાય તેજોલિઙ્ગાય વૈ નમઃ ॥ ૮॥

નમો વાયૂર્ધ્વલિઙ્ગાય(૩)શ્રુતિલિઙ્ગાય વૈ નમઃ ।
નમસ્તેઽથર્વલિઙ્ગાય સામલિઙ્ગાય(૪)વૈ નમઃ ॥ ૯॥

નમો યજ્ઞાઙ્ગલિઙ્ગાય યજ્ઞલિઙ્ગાય વૈ નમઃ ।
નમસ્તે તત્ત્વલિઙ્ગાય દેવાનુગતલિઙ્ગિને(૫)॥ ૧૦॥

દિશ નઃ પરમં યોગમપત્યં મત્સમન્તથા ।

બ્રહ્મ ચૈવાક્ષયં દેવ શમઞ્ચૈવ પરં વિભો(૬) ॥ ૧૧ ॥

અક્ષયત્વઞ્ચ વંશસ્ય ધર્મે ચ મતિમક્ષયામ્ ।
અગ્નિરુવાચ ।
વસિષ્ઠેન સ્તુતઃ શમ્ભુસ્તુષ્ટઃ શ્રીપર્વતે પુરા ॥ ૧૨ ॥

વસિષ્ઠાય વરં દત્ત્વા તત્રૈવાન્તરધીયત ॥ ૧૩ ॥

ઇત્યાગ્નેયે મહાપુરાણે ગાયત્રીનિર્વાણં નામ
સપ્તદશાધિકદ્વિશતતમોઽધ્યાયઃ ।

અગ્નિપુરાણ । અધ્યાય ૨૧૭/૨-૧૩ ॥

agnipurANa . adhyAya 217/2-13..

Proofread by PSA Easwaran

*Gayatrinirvanam*

pdf was typeset on October 3, 2024

Please send corrections to *sanskrit@cheerful.com*